# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-२ (SEM-3) | प्रश्नपत्र-५ | गुणाः - ७० |
| विषयः- साहित्यम् | CC-235 | समयः - ०३ तः ०६ |
| दिनाङ्कः - २९/११/२०१६ | सन्दर्भग्रन्थः - दशरूपकम् ( प्रथमद्वितीयप्रकाशौ ) | |

॥ प्रथमान्वितिः ॥

**प्र-१ द्वयोः सन्दर्भपूर्वकं व्याख्यां कुर्वन्तु ।** ०८

१. अधिकारः फलस्वाम्यधिकारी च तत्प्रभुः ।
तन्निर्वृत्तमभिव्यापि वृत्तं स्यादाधिकारिकम् ॥

२. अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते ।
रूपकं तत्समारोपात् दशधैव रसाश्रयम् ॥

३. प्रख्यातोत्पाद्यमिश्रत्वभेदात्त्रैधापि तत्त्रिधा ।
प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम् ॥

**प्र-२ ग्रन्थकर्तुः धनञ्जयस्य परिचयो देयः ।** ०८

**अथवा**

**दशरूपकाणि विलिख्य धनिकस्य संक्षिप्तः परिचयः दीयताम् ।**

**प्र-३ निम्नाङ्कितेषु द्वयं लिखत ।** ०४

१. पञ्चसन्धयः के?

२. पञ्चावस्थाः काः?

३. के पञ्च अर्थप्रकृतयः?

**प्र-४ पञ्चानां लघूत्तराणि लिखत ।** ०५

१. किन्नाम नृत्तम्?

२. रूपकाणां भेदकतत्त्वानि कानि?

३. प्रासङ्गिकस्य कति भेदाः ? के च ते?

४. मुखसन्धेः लक्षणं किम्?

५. किन्नाम विधानम्?

६. किन्नाम वर्णसंहारः?

७. किन्नाम मार्गः?

॥ द्वितीयान्वितिः ॥

**प्र-५ कारिकाद्वयं व्याख्यायताम् ।** ०८

१. विकत्थना विचलनम् आदानं कार्यसङ्ग्रहः ।
बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ॥

२. द्वेधा विभागः कर्तव्यः सर्वस्यापीह वस्तुनः ।
सूच्यमेव भवेत् किंचिद् दृश्यश्रव्यमथापरम् ॥

३. वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।

संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥

**प्र-६ नायकलक्षणं विलिख्य तद्भेदाश्च प्रतिपादनीयाः ।** ०८

**अथवा**

**दृश्यश्राव्ययोर्लक्षणं विलिख्य सूच्यं कैः पञ्चभिः प्रतिपादयेदिति लिखत ।**

**प्र-७ आनन्दः नाम किमिति लिखत ।** ०२

**अथवा**

**नायकस्य सात्त्विकगुणान् लिखत ।**

**प्र-८ निम्नेषु द्वयोः उत्तरं लिखत ।** ०२

१. किं नाम भाषणम्?

२. सन्ध्यङ्गप्रयोजनानि निरूपयत ।

३. नायकभेदान् लिखत ।

**॥ तृतीयान्वितिः ॥**

**प्र-९ कारिकाद्वयं सविस्तरेण लिखत ।** ०८

१. द्वेधा ज्येष्ठा कनिष्ठा चेत्यमुग्धा द्वादशोदिताः ।

अन्यस्त्री कन्यकोढा च नान्योढाऽङ्गिरसे क्वचित् ॥

२. मन्त्रिणा ललितः शेषा मन्त्रिस्वायत्तसिद्धयः ।

ऋत्विक्पुरोहितौ धर्मे तपस्विब्रह्मवादिनः ॥

३. देशभाषाक्रियावेषलक्षणाः स्युः प्रवृत्तयः ।

लोकादेवावगम्यैता यथौचित्यं प्रयोजयेत् ॥

**प्र-१० नायिकायाः लक्षणानि विलिख्य सोदाहरणं भेदान् लिखत ।** ०८

**अथवा**

**रक्तैव त्वप्रहसने नैषा दिव्यनृपाश्रये – इति कारिकायाः कोऽभिप्रायः इति सम्यग्व्याख्यायताम् ।**

**प्र-११ निम्नाङ्कितेषु द्वयं लिखत ।** ०४

१. नायिकानामष्टौ भेदान् लिखत ।

२. अयत्नजान् सप्तभावान् लिखत ।

३. भावः नाम किम्?

४. किन्नाम ललितम्?

**प्र-१२ पञ्चप्रश्नाः एकेन वाक्येन समाधेयाः ।** ०५

१. वृत्तेः लक्षणं लिखत ।

२. किन्नाम उत्थापकः?

३. रथः सूतेन किं वदेत्?

४. प्रथमप्रकाशे कति कारिकाः सन्ति?

५. द्वितीयप्रकाशे कति कारिकाः सन्ति?

६. आरभटीवृत्तेः कति अङ्गानि भवन्ति?

७. सात्विकवृत्तेश्चत्वारि अङ्गानि कानि?